प्रथमः भागः

# १.देशमिह प्रीणीहि

## पठन्तु, विचिन्त्य वदन्तु

| | | |
|---|---|---|
| शिक्षकः | - | हे छात्राः। भविष्यत्काले किं कर्तुम् इच्छन्ति ? |
| प्रथमच्छात्रः | - | अहं वीरसैनिको भूत्वा देशरक्षणं करोमि । |
| द्वितीयच्छात्रः | - | अहम् अभियन्ता भूत्वा जलाशयनिर्माणादिषु भागं स्वीकृत्य देशसौभाग्याय प्रयत्नम् करोमि । |
| तृतीयच्छात्रः | - | अहं संस्कृताध्यापको भूत्वा भारतीयसंस्कृतिसाम्प्रदायान् छात्रेभ्यः प्रबोध्य देशप्रतिष्ठां वर्धयामि । |
| चतुर्थच्छात्रः | - | अहं वैद्यो भूत्वा दीनजनेभ्यः सेवां करोमि । |
| शिक्षकः | - | किमर्थं भवन्तः सर्वे देशसेवां कर्तुम् इच्छन्ति । |
| सर्वे छात्राः | - | "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" खलु ! अतः देशसेवा एव परमो धर्मः। |

**प्रश्नाः ?**

1. उपरि उक्ते सम्भाषणे छात्राः किं किं भवितुम् इच्छन्ति ?
2. सम्भाषणे देशस्य सेवा किमर्थं करणीया इति उक्तम् ?
3. अनेन सम्भाषणेन भवन्तः किम् अवगतवन्तः?

© SCERT not to be republished

## उद्देश्यम्

★ संस्कृतगीतानां द्वारा देशभक्तिजागरणम् ।
★ स्वातन्त्र्यसम्पादनाय जनानाम् ऐक्यतायै च तत्कालीनकवीनां गीतानां द्वारा तेषां योगदानज्ञापनम् ।
★ संस्कृतभाषायां विद्यमानदेशभक्तिगीतानाम् अभ्यसनाय प्रेरणादानम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगाहनम् अभिवर्धयन्तु ।

<br>

1. देशमिह प्रीणीहि मित्र
सुजनतां पोषय त्वमत्र ।
व्यर्थवाचः त्यज विनम्रः
परहितं चिन्तय सखे ॥

2. गव्यसस्ये रक्षणार्थं
योग्यमार्गे चर वयस्य ।
भुक्तिरिह चेत् शक्तिरिह खलु !
शक्तिमानेवात्र मनुजः ॥

3. असूया बत पिशाचो ननु
पिबति खलु देशस्य मज्जाम् ।
परहितं हृदि निधायैव हि
एकतामार्जय समेषाम् ॥

4. परधनं दृष्ट्वैव रुदतां
पापिनां क्व हि सुखं भवति ।
परहितं स्वस्यैव हितमिति
चिन्तने श्रेयांसि जगति ॥

5. स्वीयलाभं त्यजतु लेशं
परजनेभ्यो भवतु नैजम् ।
देश इति मृत्तिका न हि न हि
देश इति जनता सखे ॥

6. करान् धृत्वा करैर्निबिडं
देशजनता यातु चाग्रे ।
सोदरा इव सर्वमत -
जातयो यान्तु निरन्तरम् ॥

7. मतं भिन्नं भवति चेत्किम् ?
एकमतिषु जनेषु सत्सु
जातिरिति संव्याप्य जनतां
राजतां निरतं पृथिव्याम् ॥

8. शाखिनां पर्णेषु गुप्तः
कोकिलः कवनानि गायतु ।
कवनमपि विनिशम्य लोके
प्रीतयोऽङ्कुरिता भवन्तु ॥



© SCERT not to be

गुरजाड अप्पाराव महोदयेन तेलुगुभाषायां लिखितस्य ''देशमुनु प्रेमिञ्चुमन्ना'' इति देशभक्तिगीतस्य अनुवादरूपमिदं संस्कृतगीतम् ।

## सारांशः

हे मित्र ! एतस्यां जन्मभूमौ प्रीतिमान् भव । तदर्थं सज्जनः विनम्रः भूत्वा, व्यर्थविचारान् त्यज । सर्वेषां हितचिन्तनं कुरु ।

गव्यानां सस्यानां च रक्षणाय योग्यान् उपयान् आश्रय । यतः पुष्टिकरः आहारः अस्ति चेदेव जनाः शक्तिशालिनः भवन्ति । शक्तिशालिनः जनाः स्वस्थाः सन्तः सर्वं साधयितुं शक्नुवन्ति ।

असूयाभावना जननामैक्यं नाशयति । अतः सर्वेषां हितचिन्तकः भूत्वा ऐक्यं सम्पादयतु । यतः ये परेषां वृद्धिं दृष्ट्वा असूयामनुभवन्ति ते पापिनः भवन्ति । तेषां सुखं च न भवति । ये तु सर्वेषां हितमेव स्वस्य हितमिति चिन्तयन्ति ते सौख्यानि प्राप्नुवन्ति ।

अत एव स्वलाभचिन्तां त्यक्त्या स्वकीयं सर्वं सर्वेभ्यः ददातु । देशः नाम मृत्तिकापूर्णः प्रदेशः न । देशः नाम जनपूर्णः प्रदेशः इति जानीहि ।

भारतीयाः सर्वे जातिमतादिभेदं विहाय नित्यं सहोदराः इव जीवन्तु । देशे विभिन्नानि मतानि सन्ति चेदपि अस्माकं जातिः मानवजातिः इति भावना सर्वेषु सर्वत्र भवतु ।

कविकोकिलाः काव्यनियमान् अनतिक्रम्य कविताः श्रावयन्तु यतः कवितानां श्रवणेन जनाः परस्परं प्रीतिमन्तः सन्तः जीवनं कुर्युः ।

© SCERT not to be republished

## एतानि कुर्वन्तु

## I. भावावगाहनम् - प्रतिस्पन्दनम्

### अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।

१. गीतस्य भावं स्वीयवाक्यैः वदन्तु ।

२. 'भारतीयाः सर्वे मम सहोदराः' इत्येतदुद्दिश्य चर्चां कुर्वन्तु ।

३. गीतस्य श्रवणात्पूर्वं देशमुद्दिश्य कः अभिप्रायः आसीत् ?

श्रवणानन्तरं भवतः अभिप्रायः कथमस्ति ?

**आ) अधः दत्तानि पदानि गीते कुत्र सन्तीति दृष्ट्वा तेषाम् अधः रेखाङ्कनं कुर्वन्तु । तस्य चरणस्य सङ्ख्यां लिखन्तु । सम्पूर्णतया तत् चरणं पठन्तु ।**

| | | |
|---|---|---|
| (१) करान् धृत्वा | (२) मृत्तिका न हि | (३) व्यर्थवाचः |
| (४) स्वस्यैव | (५) पृथिव्याम् | (६) प्रीणीहि |

**इ) अधः दत्तान् भावान् पठित्वा तत्सम्बद्धवाक्यानि पाठात् चित्वा लिखन्तु ।**

(१) परहितं मनसि स्थापयित्वा एकत्वं साधयतु ।

(२) अनावश्यकवचनानि त्यजतु, अन्येषां हितम् आलोचयतु ।

(३) देशे स्निह्यतु मित्र !

**ई) गीते दत्तानां चरणानाम् अनुसारम् अधः दत्तान् चरणांशान् क्रमशः लिखन्तु ।**

(१) देश इति मृत्तिका न हि न हि ।

(२) एकमतिषु जनेषु सत्सु ।

(३) सुजनतां पोषय त्वमत्र ।

(४) सोदरा इव सर्वमतजातयः ।

(५) परहितं हृदि निधायैव हि ।

(६) कोकिलः कवनानि गायतु ।

(७) भुक्तिरिह चेत् शक्तिरिह खलु !

**उ) अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।**

लोके सज्जनाः दुर्जनाः च वर्तन्ते । सज्जनानां सङ्गतिः सत्सङ्गतिः, दुर्जनानां सङ्गतिश्च कुसङ्गतिः भवति । सत्सङ्गस्य प्रभावेण सद्गुणाः मनुष्येषु शनैः शनैः प्रविशन्ति अवगुणाः च बहिः निर्गच्छन्ति ।

१. केषां सङ्गतिः सत्सङ्गतिः भवति ?

२. सत्सङ्गस्य प्रभावेण मनुष्ये के गुणाः प्रविशन्ति ?

३. कुसङ्गतिः नाम का ?

४. कस्य प्रभावेण मनुष्येषु गुणाः बहिर्गच्छन्ति ?



© SCERT not to be republished

### ऊ) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

(१) कविः देशस्य नाम किमिति उक्तवान् ?

(२) परहितं कर्तुं किं करणीयम् ?

(३) परजनैः सह कथं व्यवहर्तव्यम् ?

(४) स्वस्य हितं नाम किम् ?

(५) ऐकमत्यं नाम किम् ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

(१) 'परहितं चिन्तय' इति कविः वदति । परहितं नाम किमिति स्वीयाभिप्रायं लिखन्तु ।

(२) देशस्य दृढत्वाय किं करणीयमिति लिखन्तु ?

(३) देशविषये कीदृशी भावना जनेषु उत्पादनीया ?

(४) कक्ष्यायां छात्राः यदि भेदभावनाः दर्शयन्ति, तेषां मध्ये स्नेहभावनायाः विकासाय भवान् किं करिष्यति?

### आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

(१) देशविषये कविहृदयं कथमस्तीति विवृण्वन्तु ।

(२) भारतदेशे भिन्नत्वे एकत्वमस्ति । भवन्तः तत्कथं समर्थयन्ति ?

### इ) सर्जनात्मकतया समाधानानि लिखन्तु ।

(१) कविः देशं वर्णितवान् । भवान् भवतः ग्रामीणसौन्दर्यं तत्रत्यां संस्कृतिं च वर्णयतु ।

(२) अधः दत्तानि वाक्यानि संस्कृतभाषया अनुवदन्तु ।

1. భాషాభివృద్ధికి గురజాడ విశేష కృషి చేసారు.
2. గురజాడ కవితాశైలి సరళంగా ఉంటుంది.
3. కవి గురజాడ ఎన్నో గ్రంథాలను వ్రాసారు.
4. దేశ ప్రజల మధ్య సోదర భావం ఉండాలి.

### उ) प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।

"देश इति मृत्तिका न हि न हि । देश इति जनता सखे !"

एतत् वाक्यमुद्दिश्य एकम् अनुच्छेदं लिखन्तु ।

© SCERT not to be republished

## III. भाषांशाः

### 1. पदजालाभिवृद्धिः

#### अ) भिन्नपदम् अङ्कयन्तु ।

१. (क) गुरजाड अप्पारावः  (ख) अल्लूरि सीतारामराजः
(ग) नेताजी  (घ) शिवाजी

२. (क) स्नेहः  (ख) मैत्री
(ग) सोदरभावनाः  (घ) क्रोधः

३. (क) परहितं  (ख) स्वीयलाभः
(ग) लोकहितं  (घ) जनहितम्

#### आ) अधः दत्तानि पदानि पठित्वा पूर्वपदस्य अन्तिमाक्षरम् उपयुज्य अनन्तरपदं लिखन्तु ।

| | | | | |
|---|---|---|---|---|
| असूया | यान्तु | मित्र | मृत्तिका | करान् |
| निरन्तरम् | त्यजतु | रुदतां | त्वम् | मतम् |

**उदा** - असूया, यान्तु

### 2. व्याकरणांशाः

#### अ) एतानि वाक्यानि पठन्तु । रेखाङ्कितपदानि अवगच्छन्तु ।

१. सः उच्चैः पठति ।
२. उच्चैः मा वद ।
३. जलं विना कोऽपि न जीवति ।
४. विनाऽरोग्यं वृथाऽखिलम् ।
५. पित्रा सह पुत्रः गच्छति ।
६. मात्रा सह पुत्री गच्छति ।
७. जलम् उपरिष्टात् नीचैः प्रवहति ।
८. उत्तरतः गणेशः आगच्छति ।
९. वायुः सर्वत्र अस्ति ।
१०. ग्रमस्य पुरतः देवालयः अस्ति ।

**अत्र रेखाङ्कितानि पदानि "अव्ययानि" ।**

★ अव्ययानि त्रिषु लिङ्गेषु, सर्वासु विभाक्तिषु,सर्वेषु वचनेषु समानरूपाणि भवन्ति ।



© SCERT not to be republished

★ **सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।**

**वचनेषु च सर्वेषु यन्नव्येति तदव्ययम् ॥**

**आ) अधो निर्दिष्टानि अव्ययपदानि उपयुज्य वाक्यानि लिखन्तु ।**

विना, सह, उच्चैः, नीचैः, उपरि, सर्वत्र

**इ) अधः दत्तं श्लोकं पठन्तु अवगच्छन्तु ।**

**प्रोच्यतां संस्कृतम्, श्रूयतां संस्कृतम् ।**

**दृश्यतां संस्कृतम्, स्पृश्यतां संस्कृतम् ॥**

- अत्र प्रत्येकमपि पादस्य अन्ते अक्षरसमुदायस्य आवृत्तिः भवति ।

**विवरणम् - यत्र पादान्ते अक्षरस्य वा, अक्षरसमुदायस्य वा आवृत्तिः भवति, तत्र "अन्त्यानुप्रासालङ्कारः" भवति।**

**ई) अधः दत्तानां प्रश्नानाम् आधारेण दत्तस्य श्लोकस्य अलङ्कारनिरूपणं कुर्वन्तु ।**

**नागेन्द्रहाराय त्रिलोचनाय**

**भस्माङ्गरागाय महेश्वराय ।**

**नित्याय शुद्धाय दिगम्बराय**

**तस्मै नकाराय नमश्शिवाय ॥**

१. अस्मिन् श्लोके कः विशेषः दृश्यते ?

२. अयं कः अलङ्कारः ?

३. अन्त्यानुप्रासालङ्कारे कः अंशः अस्ति ?

**उ) अधः दत्तस्य श्लोकस्य अलङ्कारनिरूपणं कुर्वन्तु ।**

**जगन्मरीचिमालिनी जगन्महत्त्वशालिनी ।**

**जगत्प्रमोदपालिनी जगच्छुभैकशालिनी ॥**

**परियोजनाकार्यम्**

देशसेवां कुर्वतां महनीयानां जीवनविशेषान् सङ्गृह्य भित्तिपत्रे विलिख्य कक्ष्यायां प्रदर्शयन्तु ।

**अप्रियाण्यपि पथ्यानि ये वदन्ति स एव सुहृदः ।**

© SCERT not to be republished